Introduction

# "रससिद्धान्तस्यमनोवैज्ञानिकंदार्शनिकंचमूल्याङ्कनम्"

## प्रस्तावना

भारतीयसाहित्यशास्त्रे रससिद्धान्तोऽयमतीव प्राचीनतमः सिद्धान्तः। रससिद्धान्तस्य प्रस्थापकः नन्दिकेश्वरः आसीदिति काव्यमीमांसाग्रंथस्याध्यनेन ज्ञायते। आचार्य नन्दिकेश्वरः भरतादपि प्राचीनतमः इतिशास्त्रज्ञैः प्रतिपाद्यते। आनन्दस्यानुभूतिः रसः। आनन्दोजीवस्यधर्मः। नायं रसः आनन्दात् व्यतिरिच्यते। रस्यते आस्वाद्यतेऽसौ इति रसः। प्राणभूतो सकलोऽपि व्यापारो रसाभिलाषमूलः न केवलं काव्यकलापे अपितु व्यवहार जगत्यपि च प्राणभूतं रसमुद्दिश्यैवाहारविहारादि प्रवृत्तिः। आनन्दमभिलक्ष्यैवविषयेष्वभि निवेशः। एतस्मादेवहेतोः काव्यजनित आस्वादोऽपि रस एव। तस्य स्वरूपं हि ब्रह्मणोरूपाद् भिन्नम्। रसो निराकारः। काव्यो हि अस्ति तस्याकारः। कविः आत्मानं प्रकटीकर्तुमेवकाव्यसर्जनां करोति। स काव्ये शब्दार्थौसुधामयं कृत्वावतारयति। कलायामाकलितौ शब्दार्थौ भव्यं सात्विकमजेयं बलमधिगम्य जगतिघटिताःघटनाः चित्र-विचित्राः क्षमौ घटयितुं जायेते। काव्यकला कलानां साम्राज्ञी। काव्यजनितं माधुर्य निपीय रसिकाः यादृशमानन्दमनुभवन्ति। तादृशं न अन्ये। कवेः काव्यं सत्यं शिवं सुन्दरं च भवति। काव्यं स्वाभिमतं प्रकाशयितुं न अभिधावृत्तिमवलम्बते न च लक्षणां न च मीमांसकप्रियां तात्पर्यमेव। तत्तु व्यञ्जनामेवाश्रयति।व्यञ्जनयाकाव्यं वस्तुतोऽनन्यलभ्यां प्रकर्षश्रियमधियाति। अनेन तल्लोकोत्तरं सञ्जायते। वस्तुतः दार्शनिकानां कारणकार्यसम्बंधरूपाधारेण विशिष्ट परिस्थिति वशात् तस्य कार्यस्य आविर्भावो भवति। यथापरिस्थितिनिबंधने निपत्य हैयङ्गवीनम् दुग्धादुद्भवति, तथैव चेतनारूपकारणात् रसचेतनारूपकार्यमुद्भवति। चेतना रसचेतनयोर्मध्ये कोऽपि भेदो नास्ति।चेतनारूपकारणस्य सर्वाण्यपि लक्षणानि रसानुभूतिकार्येऽपि व्याप्तानि सन्ति। अतः चेतनारूपकारणं रसानुभूतिकार्यमुभयमपि यथार्थतः एकमेव। यथादुग्धरूपकारणस्य दधिरूपकार्यपरिणामस्तथैव चेतनारूपकारणस्य रसचेतनारूपकार्यपरिणामो भवति। सांख्यदर्शनदृष्ट्या एष विचारः प्रस्थापितः। दर्शनदृष्ट्या कारणकार्ययोर्मध्ये वस्तुतः एकत्वमेव। व्यवहारवशादिदंकारणं इदं कार्यमिति प्रोच्यते। कटककुण्डलादीनिवस्तूनि आभूषणादीनि सुवर्णेन निर्मितानि भवन्ति। परं तत्वदृष्ट्या कटककुण्डलादीनि आभूषणानि न सुवर्णाद् भिन्नानि। वस्तुतः सुवर्णमेव कटककुण्डलादि आभूषणरूपं व्याप्य समुपतिष्ठते। न

सुवर्णादपरमन्यर्तकिमपि। सुवर्णमिवविभिन्नेषु रूपेषु वर्तते। एवमेव चेतनारसचेतनयोर्मध्ये एकत्वमेव। तथैव सुवर्णकटककुण्डलयोर्मध्ये एकत्वमेव। यथा सुवर्णमेव कटक कुण्डलादि विभिन्नरूपेषु वर्तते तथैव चेतनैव रसचेतनारूपे विद्यते। व्यवहारवशादेव चेतनेयं रसचेतनेयं इति निरूप्यते। रसास्वादनं नामप्रियमधुरानुभूतिः। कलाकारः स्वकौशलेन सहृदयोरसप्रवणतया जीवनस्यदैनिकंसत्यंपरिपालयन् तदेवोपादानीकृत्य रसमास्वाद्यते। माधुर्यमोजःप्रसादःकिञ्च एतत्समस्तकोटिकाश्चित्त-सम्बंधजुषो द्रुति-दीप्ति विस्तारा रसोपकारिणो मता भवन्ति। एतैः रसस्यश्रीविश्ष्टितामापद्यते। नैतिकतायाः उन्मेषार्थं काव्यात् परं किमपि सुन्दरं प्रकृष्टञ्च साधनं न विद्यते।

सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्योब्रह्मास्वादसहादरः।।
लोकोत्तरचमत्कारप्राणःयःकैश्चित्प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वादतेरसः।।1(सा0द03:2)

'कर्तव्याः काव्येषुरसाः बुधैः'इत्युक्तत्वा आचार्य भरतेन यस्यां रचनायां रसः सैव काव्यमिति निगदितम्। अयं रसः कः? इत्यत्र तत्वविदो वदन्ति---'चेतनायां विश्ष्टिापरिणतिर्हि रसः।' नाटकादिदर्शनात् काव्यस्य चाध्ययनात्, श्रवणाद् वा रसस्यनिष्पत्तिर्भवति। तदा तत्र सौन्दर्यं मनुष्यः प्रेक्षते।तस्य च स बोधं विदधाति तन्मानसे रसः सञ्चारितुमारभते। अस्यामनुभूत्यां समग्रो निधिरतीतानागत परक आत्मानमभिव्याप्य समुपस्थितः सञ्जायते। रसश्चेतनायाः सर्वथैवोन्मीलिततया श्रिया सचेतसात्मनोऽखण्डालोकेन दीप्यमानो भूत्वा प्रादुर्भवति। सौन्दर्यचेतनायाः कलात्मकतायाः आधार एव नृत्य-नाट्य-सङ्गीत-चित्र-मूर्त्यादिकलाः सन्ति। आचार्यभरतमुनिविरचितं नाट्यशास्त्रं अस्मिन् विषये कृत्स्नतया प्रकाशं क्षिपति। साहित्यशास्त्रे रसमीमांसायां आध्यात्मिक्यः कलात्मिक्याश्च विचारणाः मनोविज्ञानस्य भूमिं एव निष्पन्नमानाः प्राप्यन्ते। अत्याधुनिकैः मनोवैज्ञानिकैः फ्रायड,एडलर,युंग,रिचर्डस प्रभृतिभिः स्वकीयग्रंथ द्वारा प्रकाशिताः सिद्धान्ताः आधुनिक पाश्चात्यनिरूपण सरणिराधारा विराजन्ते। एतान् च सिद्धान्तानवलम्ब्यैव प्रसिद्धैराधुनिकैः मनोवैज्ञानिकैः काव्यतत्वदर्शिभिश्च निरूप्यन्ते। सर्वेषां जीवनराशीनां हृदयेषु वासनात्मतया स्थिताः भावाः सर्व बाह्यव्यापाराणां नियामकाः उत्तेजकाश्च भवन्ति। भावना प्रचोदिताः जनाः तदनुसारं प्रवर्तन्ते। एष एव लोकव्यवहारः पुराणेतिहासादिषु कथारूपतया समुल्लसति। तस्माद् पुराणेतिहासादीनां काव्यनाटकादीनां चाध्ययनम् अन्तर्विलीनानां भावानाञ्च पठनमेव भवति।ते च भावाः अविच्छिन्नप्रवाहेण प्रसरन्तीत्याधुनिक पाश्चात्यमनोवैज्ञानिकाः मन्यन्ते। अस्यां वर्तमानायां शताब्यामेव मनोविज्ञान सिद्धान्ताः समारब्धाः अभवन्। तदनन्तरमेव तानसिद्धान्तानवलम्ब्य तत्र साहित्यनिरूपणमपि लोचनपथमवतरत। एषा निरूपणसरणिः मनोवैज्ञानिकं निरूपणमिति नाम्ना प्रसिद्धोजाता। आचार्यैः प्रयत्नः कृतः। अपरतश्च

भावानामानन्त्यमाधृत्य रसानामानन्त्यमसाधयन्। दार्शनिकानां मते रसो हि मूलतोऽस्ति शमः अस्मादेवशमात् सर्वेरसाः उद्भवन्ति विलीयन्ते च तत्रैव। आचार्य भरतस्य रससूत्रावगाहनात् तथ्यमिदम् संलभ्यते। सर्वेषामपिरसानां शम एवान्ततोगत्वा परिणमनात् अध्यात्मवादिनो रसस्य परिग्रहणमात्मनश्चेतनायां वा स्वरूपत्वेन कुर्वते। अस्ति सात्मनः आनन्दमयं रूपं। इदं हि स्वरूपं कलायाः सौन्दर्यमुन्मीलयति। व्यवहाराः वासनाश्च तदात्मनः उपरि आवरणं प्रक्षिप्येतं परमार्थतः आनन्दाच्च दूरे नयन्ति। अतएव चिदावरणच्छेदनमेव रसस्यास्ति सारः। रसविषयकानुभूतिः न समाधिविषयकानुभूतिरिव भवति। रसे इन्द्रियाणि सौन्दर्य साक्षात्काररीत्योपभुञ्जन्ति। प्राणाश्चतल्लीनां भवन्तः प्लवन्ते दर्शनमनोविज्ञानयोर्प्राविधिकीं शब्दावलीं परित्यज्य सामान्यतया शब्दावल्या वक्तुं शक्यते यत् 'शब्दार्थमाध्यमेन भावस्यकलात्मिकाभिव्यक्तिः काव्यमिति।' तस्य चानन्दस्यास्वादो रस इति। शब्दार्थमाध्यमेनाभिव्यक्तस्य भावस्यानन्दमयास्वादः एव रस इत्याशयः। नूनमयमस्वादो विषयिगतः न तु विषयगतः इयं हि आस्वादयितुमेव रसानुभूतिः। मनोविज्ञानपण्डितेषु भावस्य मानसिक शारीरिक रूपाणाम् पूर्वापर कार्यक्रमधिकृत्य भूयान् विवादः प्रचलति। जेम्सफैक्डूगलप्रभृतयो वदन्ति यद् भावस्य मानसिकरूपं शारीरिकरूपस्य परिणामोऽस्ति। संस्कृतकाव्यशास्त्रे लौकिकस्यभावस्य वर्णनं स्वभावादेव नास्ति। तत्र तु काव्यगतानां भावानामेवरसः। परमेते हि काव्यगताः रस व्यञ्जकाः वा भावाः नूनमेव चित्तिवृत्तिरूपाः। भावशब्देन तावत् चित्त वृत्तिविशेषाः एव विवक्षिताः इति। अतश्चित्तवृत्याधारेण मनोविज्ञानानुसारेण च स्थायिसञ्चारिभावाः विवेचयितुं शक्यन्ते । आचार्यभरतादारम्य पण्डितराजजगन्नाथपर्यन्तं यावत् स्थायिसञ्चारिविवेचनं प्रायः सर्वैराचार्यैः कृतम्। अत्र प्रत्याचार्य मत पृथगुल्लेखपेक्षया सर्वविवेचन सार प्रस्तुरिति समीचीना स्यात् इत्यस्माभिर्प्रयत्नः कृतः। स्थायीभावाः वासनात्मतया प्रमातृचित्ते तिष्ठति। कारणोस्थितरनन्तरापि तत्सत्ताभवति। सञ्चारिणस्तु कारणनुपस्थितो निःशेषतामेव श्रयन्ते।स्थायिभावाः स्थिराः, सञ्चारिभावाश्चास्थिरामनोदशेति। प्रतिसहृदयहृदयं हि वासनात्मतया स्थितेः स्थायिनः साधारणीकरणं सुकरं भवति। मनोविज्ञानेभावानां वर्गविभाजनं नूनमिदमन्ततया न संभवति। मनोविज्ञानं हि विज्ञानम्। विज्ञानमुपयुक्तमनुपयुक्तं सुन्दरमसुन्दरम् साधु-असाधु, तीव्रं-मन्दमुपाध्याधारेण कदापि वर्गीकरणं न करोति।तथापि जीवनेऽस्त्येवेतादृशी भेदाः। विज्ञानम् नात्र प्रपञ्चेनिपतति। एतस्य तत्परिधिर्वहिर्गतत्वात्।अत्र स्पष्टं भवति यत् भरतवर्णनं कियन्मात्रतया वैज्ञानिकम्। विभावान्तर्गतत्वेन शून्यस्थानान्धकारः विकृत्वा अपरिचिता करादिनाम् व्यभिचार्यानुभावान्तर्गतत्वेन च स्तम्भ-स्वेद-स्वरभङ्गहृदय शरीरकम्प परित्राणान्वेषण त्रास पूर्वकपलायन जडता त्रासावेश चपलतादीनाम् भरतेन तथा फ्लैचरनामकेन मनोवैज्ञानिकेन समानमेव वर्णनंकृतम।मनोविज्ञाने तु सामान्येनमनोवेगानां संख्यायाः

प्रश्न एव नोदेति। किन्तु सहजवृत्तीनां सम्बन्धे यासांवर्गीकरणस्य प्रयत्नः समये-समयेऽक्रियत तदा मनोविज्ञानां गणनाऽप्यावश्यकं भवति। प्रायः मनोवैज्ञानिकानां मतेन यज्जीवे स्वभावतः काश्चनमूलवृत्तयो भवन्ति! तदनुसारेण मूलवृत्तिः सा प्राकृतशक्तिरस्ति यया प्राणी विना प्रयत्नेन कार्यविशेषे प्रवर्तते। अस्यां प्रक्रियायाच्च विश्ष्टिरूपं कमपि मूलवृत्तिः सानुवंशिकी सहजामानसिकी शारीरिकी च प्रवृत्तिरस्ति यस्याः प्रेरणया प्राणी कस्यचित्पदार्थ विशेषं प्रत्यक्षंज्ञानमर्जयति। तं प्रत्यवदधति।तदुपस्थितौविश्ष्टिौ च कमपि मनः संवेगमनुभवति रीतिविशेषेण च तद्विषये क्रियाशीलोभवति। क्रियाशीलीभवितुं वाऽऽवेगमनुभवति। मनोविज्ञानस्य विकासक्रमे मैग्डूलनस्य स्थितिः प्रायो मध्यवर्तिन्यस्ति। तस्यविचाराः जैम्सशैडादिवत् प्राचीनाः न सन्ति न वा अत्याधुनिक अमेरिकामनोवैज्ञानिकवत् सर्वथा नवीनाः एव। परमेतेषां सम्बन्धः शारीरिक क्रियाभिः सहाधिकोऽस्ति। अत एवासांसहकारीमनोविकारो मनः स्थितिर्वा नातिस्पष्टा नापिविशिष्टा भवति। इमां नूनं नास्माकं विशेषणोपयोगिन्यः। प्रायः पाश्चात्यमनोवैज्ञानिकानामानुसारेण प्रवृत्तिमूलकाः मनोविकाराः साधारणतया दशैव भवन्ति रतिहासक्रोधभयजुगुप्सौत्सौक्यवात्सल्याहंकारार्ति सहानुभूतयः।एषु प्रथमे सप्त संस्कृतोक्तस्थायिभवेभ्यः प्रायो न भिद्यन्ते। अद्यतनंमनोविज्ञानं मैग्डूलनाद्दूरमपसृतम्। मूलवृत्तीनांवर्गीकरणे संख्याने चापि भूयसी प्रवृत्तिर्जायतेत्यत्र नास्ति संदेहः। वस्तुतः स्थायिभावानां स्थितिः पौरस्त्यपाश्चात्यमनोविज्ञानात्प्रतिकूला नास्ति। संख्यानिर्धारणमपि न सर्वथा निराधारम्। आचार्यभरतविवेचनैः स्पष्टं 'यथा तस्य दृष्टावमीषां भावानामभिनयात्मकं रूपमेव प्रमुखम्, मनोवैज्ञानिकं तु गौणम्। केचनमनोवैज्ञानिकैः पौरस्त्य विचार शास्त्रानुसारेण चतुर्षष्टिः मनोविकाराः परिगणिताः। येषूक्तानुक्ता अनेके मनोविकाराः संस्कृतसात्यिशास्त्रीयाणाम् त्रयस्त्रिंशतो द्विचत्वारिंशतो वा सञ्चारिणाम् परिधेर्बहिः पतन्ति। मनोविकाराः हि मनोवस्तु प्रति प्रतिक्रियाः सन्ति। याः प्रतिवस्तु परिवर्तन्ते।मनस्त्यनेके तरङ्गाः उद्भवन्ति ते मिथोऽनेकैःरूपैर्मिलिता न जाने कति-कति मनोविकारान् भावयन्ति। वस्तुतः रससिद्धान्तस्य वास्तविकमाधारो भाव एव। यस्यभेदानां गणना न संभवति, नाप्यपेक्षते। गम्भीरचेतोभिराचार्यैरपि संख्यायै महत्वविशेषो न दत्तः। अथ एवैकतः सर्वेषामपि रसानामेकस्मिन्नेव समाहरणाय मनोवुध्यादिकानां च वृत्तयः कामपि विन्दमाना विराजन्ते। परं वृत्तीनां निरोधान्न मनः समाधौ गतिमुद्भवति। तस्यशून्यत्वात् सम्पूर्णवृत्तीनामलसात्मिकया गत्या सौन्दर्येऽवगाहते। वस्तुतस्तु अध्यात्मवादो न सौन्दर्यबोधं न च तच्चेतनायाः लक्षणानि व्याख्यातुं क्षमते।

एषारससमीमांसा तु भारतीयाऔपनिषद्की परम्परायाः जायमाना सारभूता तत्वाभिनिवेषिनी ग्राहिका। रसास्वादने मनोबुद्धिचित्ताहङ्कारप्राणेन्द्रिय शरीराणां न

विलयो जायते अपि तु तदा सर्वेषामप्येतेषां नवोन्मेषो, नूतनंस्फुरणं, दिव्यजागरणं च जायन्ते। कदापि तमोऽवस्थायां रसास्वादनं न भवति। न च मनसो मलीमसदशायां नच चिन्ताग्रस्ते चित्ते, न चाहंभावस्योद्रेके, न च प्राणेन्द्रियादि कानामुत्तेजोग्रस्तास्वस्थतायामेव। तेषांसर्वेषांप्रवृत्तिरुन्मुखता गतिश्च व्यवहारेभ्योऽखिलेभ्यः आवश्यकताभ्यश्च सर्वाभ्यो निवर्तन्ते। सावस्था ज्ञानं विहाय संसारमपि वृणुते कदापि-कदापि च स तं हित्वात्मानं ज्ञाने रमयति। निश्चप्रचतयाबुद्धेः क्रिया अन्ततो गत्वा रसास्वादनोन्मुखीजायते। इयं हि रसचेतना वस्तुतोऽनिर्वचनीयास्ति। तामनिर्वचनीयां रसचेतनां बुद्धिमानसेन्द्रियाणि स्वसहजक्रियाभिः सौन्दर्यस्वभावगुणपरिपूर्तिपुरस्सरमेकान्ततो विश्लिष्टतां नयन्ति। अतएव रसानुभूतिमध्ये एतेषां सर्वेषां समावेशो वर्तते।

वस्तुतः कला अस्ति सौन्दर्यम्, आनन्दस्तस्या असुत्वाय कल्पते। आत्मा च तस्याः रसः सुविदितः कलातत्वज्ञो हरवर्टरीडो जीवनस्य चेतनायाश्च विकासव्यवस्थायाश्च प्रेरणां कलायाः सौन्दर्ये निहतां मन्यन्ते। कलायाः महत्वपूर्ण कार्यमस्ति सौन्दर्योद्घाटनम् । इदं सौन्दर्य रसस्याधायकम। तमेवरसं रसिकमास्वादयति।रसास्वादनायमनसो रेचनमपेक्ष्यते। यावन्मनोरेचनं स्यात् तावदेव रसानुभूत्यां तीव्रतोद्भवेत्।

वस्तुतः कला कलायाः कृते ये वदन्ति तेषां कवीनां काव्यानि विविधालङ्कार शब्दार्थचमत्कार प्रसाधनैः प्रसाधितानि सुगुम्फितानि सुश्लिष्टानि जायन्ते। तेषां भावात्मकं सौन्दर्य तत्रत्याभ्यन्तरी शोभा वा बाह्याशोभाविद्युत तरलतया चारुतया आव्रियते।

कलामानव जीवनोत्थापनाय ये वदन्ति तेषां काव्ये शब्दचित्रतायाः प्राधान्यं प्रायः न लोचनपथमवतरति। न तानिकाव्यानि अलंकार, शब्दचमत्कारचारुता चञ्चच्छटाभिराक्रान्तानि भवन्ति। तेषां काव्यं मानवजीवनोत्थाय एव भवति। चेतनारूप कारणात् चेतनारूपकार्यमुद्भवति। चेतनारसचेतनयोर्मध्ये कोऽपि भेदो नास्ति। चेतनारूपकारणस्य सर्वाण्यपि लक्षणानि रसानुभूति रूपकार्येऽपि व्याप्तानि भवन्ति। यथादुग्धरूपकारणस्य दधिरूप कार्यपरिणामस्तथैव चेतना रूपकारणस्य रसचेतनारूपकार्यपरिणामो ज्ञेयः। सांख्यदर्शन दृष्ट्या एष विचारः समुपस्थापितः।

वेदान्तदृष्ट्या कारणकार्ययोर्मध्ये वस्तुतः एकत्वमेव । व्यवहारवशादिदं कारणं कार्यमित्युच्यते। यथा सुवर्णेन कटककुण्डलादीनि भूषणानि बहुविधानि निर्मितानिभवन्ति। परं तत्वदृष्ट्या कटककुण्डलादीनिभूषणानि न सुवर्णाद् भिन्नानि। तथैव चेतनैव रसचेतनारूपे विद्यते। अनेनकारणेन विवर्तवादमाश्रित्य वेदान्तिनाः उभयोरपि अभिन्नत्वं निरूपयन्ति। एवं रसास्वादनं नाम आत्मसौख्यानन्त सागरे

संतरणम्, संतरणे सर्वा अपि मनोग्लानयः सर्वेचाधयःव्याधयः उपरमन्ते। कमपि रागं श्रोत्रमिन्द्रिय मनोबुद्धिचित्त भावनाहंभावादि व्यक्तित्वस्यानेकभूमिषु याः क्रिया जाग्रति ताः जागृताः क्रिया, ताः प्रवृत्तौ विनिविष्टाश्चेष्टाः एव रसास्वादनभूताः सन्ति। रसास्वादनप्रक्रिया मनोद्विग्नदशायां तथा चिन्ताग्रस्ते चित्ते न जायते। निश्चप्रचया बुद्धेः क्रिया अन्ततोगत्वा रसास्वादोन्मुखी प्राप्यते। इयं हि रसचेतना वस्तुतोऽनिर्वचनीयमस्ति। तामनिर्वचनीयां रसचेतनां बुद्धिमानसेन्द्रियाणि स्व स्व सहज क्रियाभिः सौन्दर्यगुण प्रभाव परिपूर्त्ति पुरस्सरमेकान्ततो विश्र्टितां नयन्ति। रसास्वादने मनोबुध्यहङ्कारचित्तप्राणेन्द्रियशरीराणाम् न विलयो जायते अपितु तदा सर्वेषामप्येतेषां नवोन्मेषो नूतनं स्मरणं दिव्य जागरणं च जायन्ते।

साहित्यशास्त्रे पूर्वं सर्वैरालङ्कारिकैः भामहदण्युद्भटरूद्रटादिभिरलङ्कारस्यैव महत्वं प्रतिपादितम्। न तैः रससिद्धान्त तथा मनोविज्ञान सम्बन्धे कुत्रापि विमर्शो विहितः। रससिद्धान्तस्य पूर्वं वेद-वेदान्त दर्शन शास्त्रेषु किं स्वरूपमासीत् रसस्य। पाश्चात्यदर्शनेषु मनोविज्ञानादिषु शास्त्रेषु किं स्वरूपमासीत् रसस्य? एतत् सर्व पर्यावलोचितमस्माभिः। रससिद्धान्तस्य प्रक्रियात्मकः दार्शनिकश्च पक्षौ सुपुरातनौ। पूर्ववर्तिनां सर्वेषां रससिद्धान्त ग्रन्थानां विषयाः प्रतिपादिताः। वेदान्त न्यायमीमांसा काव्यशास्त्रादीनां सिद्धान्ता इह पर्यावलोचिता रससिद्धान्त समीक्षयोः सार्द्धमित्यस्याः मञ्जूषायाः वैश्ष्ट्यम्।

साहित्यशास्त्रस्य अनेकैः पण्डितैःविद्वद्भिश्च रससिद्धान्तमधिकृत्य वैदुष्यपूर्णा अनर्घ्याः निबन्धाः प्रणीताः । परन्तु रससिद्धान्तस्य दार्शनिकं मनोवैज्ञानिकं विवेचनमधिकृत्य, मनोवैज्ञानिकं तथा पाश्चात्यभारतीय दर्शनशास्त्रीयविचारमवलम्ब्य निबद्धो निबन्धो मम लोचनपथे गोचरतां नायातः। अतएव रससिद्धान्तस्य दार्शनिकं तथा मनोवैज्ञानिकमाश्रित्य शोधकार्य मया निर्धारितम्।

आचार्य भरतादारभ्य पण्डितराज जगन्नाथ पर्यन्तं यदि वयं रससिद्धान्तस्य पर्यावलोचनं कुर्मश्चेद् भावविभावादीनां व्यभिचारिभावादीनां मनोभावानां विवरणं प्राप्स्यामः परन्तु तस्य मनोवैज्ञानिकं विवेचनम् तथा रीत्या अद्यावधिपर्यन्तं विवेचितं विश्लेषितं नैव दृश्यते। रसस्य विभावादयः मानवजीवनस्य मूलप्रवृत्तिरूपाः सन्ति। तेषु मानवस्य मनोविकारान् प्रकटीकर्तुं शक्यते। विषयोऽयं दर्शनमनोविज्ञान छात्राणां कृते नितरां उपयोगि भविष्यति। इति ममाभिप्रायः। अयं समीक्षणं न केवलं भारतीयानां कृते अपितु पाश्चात्य पण्डितानां कृते अपि एकां नूतनां सरणिं दिशा च प्रस्थापयिष्यति।

रसो हि काव्यशास्त्रस्य परमं रहस्यम्, असौ तत्सूक्ष्मं बीजं यस्मादङ्कुरितो काव्यविटपः रीत्यलङ्कारादीन् सर्वसिद्धान्तानतिशयानुद्धरकंधरः सन् विलसति। शब्दार्थभूमौ पल्लवितस्य तस्य काव्यविटपस्य शाखा-प्रशाखा रूपाः

ध्वनि-रीति-वक्रोक्त्यिलङ्कारादयः सन्ति। तेन च रससिद्धान्तस्य आमूल-चूलमनुशीलनम् परमावश्यकम्।

मया खलु प्रस्तूयमानेऽस्मिन् निबन्धे रससिद्धान्तस्य दार्शनिकं तथा मनोवैज्ञानिक तत्वानां सूक्ष्मेक्षिकया विवेचिता। तस्यमूलस्वरूपं तद्‌भेदोपभेदाश्च वैशद्येन प्रतिपादिताः। रसध्वनिविरोधिनां जयन्तभट्ट, जगदीशतार्किकालङ्कार प्रभृतीनां तार्किकानाम् मुकुलभट्ट प्रभृतीनां मीमांसकानां, भट्टनायक, कुंतक,प्रतिहारेन्दुराज,भोजराज,क्षेमेन्द्र, प्रभृतीनामालङ्कारिकानां मतं यथामति समुपस्थापितम्। व्यञ्जनोज्जीवितस्य ध्वनि तथा रससिद्धान्तस्य प्रतिद्वन्द्विप्रस्थानैः सह साम्यं वैषम्यञ्च प्रस्फुटीकृतम्। एवमानन्दवर्द्धनादाराभ्य पण्डितराज जगन्नाथ पर्यन्तं रसविषयकः सम्पूर्णो विचारः इतिहासक्रमेणात्र सन्निवेशितम्। इत्येव वैशिष्ट्यमस्य शोधप्रबंधस्य। अस्यशोधप्रबंधस्य सप्त परिच्छेदाः सन्ति। प्रत्येक परिच्छेदस्य विवरणं निम्ननिर्दिष्ट क्रमेण प्रस्तूयते।

प्रथम परिच्छेदे पृष्ठभूमिः, पृष्ठभूमौ रससिद्धान्तस्य पुरातनत्वम्, रससिद्धान्तस्य परिकल्पना, वेदादिशास्त्रेषु उपनिषत्सु-रामायण-महाभारतादिषु ग्रंथेषु, कामसूत्र-नटसूत्रादिषु ग्रंथेषु रसस्य स्थानं तथा रसस्यदार्शनिकं मनोवैज्ञानिकं चानुशीलनम् कृतं वर्तते। आवश्यकतानुसारेण पण्डितानां दार्शनिकानां तथा मनोवैज्ञानिकानां मतमपि संदर्भपुरस्सरं समुद्धृतं वर्तते।

द्वितीयपरिच्छेदे मनोविज्ञानस्य स्वरूपं परिभाषा च, मनोविज्ञाने चैतन्यस्य महत्ता आत्मानिरूपणञ्च, मनोविज्ञाने इन्द्रिय तथा शरीरनिरूपणम्, मनोधर्मनाडीचक्रादीनां निरूपणम्। संशयनिरूपणम्, तर्कविपर्यय-ऊह-विकल्पनिरूपणम्, स्मृति-प्रत्यभिज्ञा सुखदुःखादीनां निरूपणम्,इच्छाचिकीर्षादि भावात्मक मनोवृत्तीनां निरूपणम्। अतीन्द्रियमनोधर्मनिरूपणम्, संस्कारनिरूपणम्, निर्विकल्पक प्रत्यक्षनिरूपणम्, अलौकिक प्रत्यक्षनिरूपणम्।साक्षिप्रत्यक्षम्, अभावप्रत्यक्षनिरूपणम्, जातिप्रत्यक्षनिरूपणम्, प्रतिभा निरूपणम्, अनुमितौ शाब्दबोधे स्फोटवादे च मनस्तत्वम्, मानसभ्रान्तिनिरूपणम्, स्वप्ननिरूपणम्, इत्यादीनां विविधानां मनोवैज्ञानिक तत्वानां प्रसङ्गानुसारेण निरूपणं कृतं वर्तते।

तृतीयपरिच्छेदे रसस्यसाम्प्रदायिकता, रसः काव्यनाट्ययोरनिवार्यधर्मः, रसः काव्यस्यात्मा, विभिन्न सम्प्रदायेषु रसविषयिकी चर्चा, अलङ्कार,ध्वनि,वक्रोक्ति,रीति,औचित्यादिषु सम्प्रदायेषु रसस्य स्थानं ग्रंथेऽस्मिन् निरूपितं वर्तते।

चतुर्थपरिच्छेदे रसस्यस्वरूपम्, रसस्यदार्शनिकं स्वरुपम, रसस्यमनोवैज्ञानिकं स्वरुपम्, भारतीय तथा पाश्चात्यपण्डितानां मतम्, सविशदं निरूपितं वर्तते।

पञ्चमपरिच्छेदे रसनिष्पत्तिविषये विविधाः वादाः, विविधानामाचार्याणां सिद्धान्तः, उत्पत्तिवादः, अनुमितिवादः, अभिधावादः, अभिव्यक्तिवादः तद्विषये समाधानञ्च निरूपितं वर्तते।

षष्ठपरिच्छेदे रससिद्धान्तस्य दार्शनिकं विवेचनम् भारतीयौपनिषदीं परम्परां तथा भारतीयदर्शनविचारसरणिमवलम्ब्य कृतं वर्तते। तेन सह वेदोपनिषद्मीमांसान्यायवेदान्तादि दर्शनेषु भारतीयमनोविद्यायां निरूपितानां मनोवैज्ञानिक तत्वानामाधारेण रससिद्धान्तस्य मनोवैज्ञानिकं विवेचनं कृतं वर्तते।

सप्तमपरिच्छेदे रससिद्धान्तस्य भारतीय तथा पाश्चात्य मनोविज्ञान दृष्ट्या तुलनात्मकं विवेचनम् कृतं वर्तते। रससिद्धान्ते वर्णितानां विविधानां मनोभावानां मनोवैज्ञानिकं विवेचनम् साहित्यशास्त्रस्य विशालपरम्परामुद्दिश्य विवेचितं वर्तते तेन सह विभावानुभाव सञ्चारिभावानां मनोवैज्ञानिकं विवेचनम् भारतीय साहित्य शास्त्र दृष्ट्या कृतं वर्तते। साधरणीकरण व्यापारस्य दार्शनिकं मनोवैज्ञानिकं चानुशीलनम् भारतीय तथा पाश्चात्य मनोवैज्ञानिकानां दृष्ट्या कृतं वर्तते। विभावानुभावसञ्चारिभावानां तथा विविधानां मनोभावानां मनोवैज्ञानिकं विवेचनं सप्रसङ्गानुरूपेण कृतं वर्तते।

अष्टमपरिच्छेदे अस्य शोधप्रबंधस्य उपसंहारात्मकं विवेचनं कृतं वर्तते। अस्मिन्नेव परिच्छेदे कृतानां रससिद्धान्तस्य विरूद्धाक्षेपाणां समाधानमपि कृतं वर्तते। अन्ते च—————

दधिमधुरं मधुमधुरं द्राक्षामधुरा सिताऽपिमधुरेव।
तस्य तदेव हि मधुरं यस्यमनो यत्र संलग्नम्।।